# Sarasvati Ashtakam

# સરસ્વત્યષ્ટકમ્

## Document Information

Text title : sarasvatyaShTakam 1

File name : sarasvatyaShTakam.itx

Category : aShTaka, devii, sarasvatI, devI

Location : doc_devii

Author : Traditional

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Description-comments : From Brihatstotraratnakara with 408 stotras

Source : padmapurANa

Latest update : June 5, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 8, 2023

*sanskritdocuments.org*

# સરસ્વત્યષ્ટકમ્

શ્રીગણેશાય નમઃ ।
શતાનીક ઉવાચ ।
મહામતે મહાપ્રાજ્ઞ સર્વશાસ્ત્રવિશારદ ।
અક્ષીણકર્મબન્ધસ્તુ પુરુષો દ્વિજસત્તમ ॥ ૧॥

મરણે યજ્જપેજ્જાપ્યં યં ચ ભાવમનુસ્મરન્ ।
પરં પદમવાપ્નોતિ તન્મે બ્રૂહિ મહામુને ॥ ૨॥

શૌનક ઉવાચ ।
ઇદમેવ મહારાજ પૃષ્ટવાંસ્તે પિતામહઃ ।
ભીષ્મં ધર્મવિદાં પૃષ્ઠેદં ધર્મપુત્રો યુધિષ્ઠિરઃ ॥ ૩॥

યુધિષ્ઠિર ઉવાચ ।
પિતામહ મહાપ્રાજ્ઞ સર્વશાસ્ત્રવિશારદ ।
બૃહસ્પતિસ્તુતા દેવી વાગીશાય મહાત્મને ।
આત્માનં દર્શયામાસ સૂર્ય કોટિસમપ્રભમ્ ॥ ૪॥

સરસ્વત્યુવાચ ।
વરં વૃણીષ્વ ભદ્રં તે યત્તે મનસિ વર્તતે ।
બૃહસ્પતિરુવાચ ।
યદિ મે વરદા દેવિ દિવ્યજ્ઞાનં પ્રયચ્છ મે ॥ ૫॥

દેવ્યુવાચ ।
હન્ત તે નિર્મલં જ્ઞાનં કુમતિધ્વંસકારકમ્ ।
સ્તોત્રેણાનેન યે ભક્ત્યા માં સ્તુવન્તિ મનીષિણઃ ॥ ૬॥

બૃહસ્પતિરુવાચ ।
લભતે પરમં જ્ઞાનં યત્સુરૈરપિ દુર્લભમ્ ।
પ્રાપ્નોતિ પુરુષો નિત્યં મહામાયાપ્રસાદતઃ ॥ ૭॥

સરસ્વત્યુવાચ ।
ત્રિસન્ધ્યં પ્રયતો નિત્યં પઠેદષ્ટકમુત્તમમ્ ।
તસ્ય કણ્ઠે સદા વાસં કરિષ્યામિ ન સંશયઃ ॥ ૮॥

ઇતિ શ્રીપદ્મપુરાણે દિવ્યજ્ઞાનપ્રદાયકં સરસ્વત્યષ્ટકસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Nat Natarajan, NA

*Sarasvati Ashtakam*
pdf was typeset on July 8, 2023

Please send corrections to *sanskrit@cheerful.com*